## 3.11 ऋग्वेदीया रक्षोघ्नसूक्तम् (4.4.01-15)

ॐ अस्य रक्षोहसूक्तस्य गौतमो वामदेव ऋषिः, रक्षोहाग्निर्देवता, त्रिष्टुप्छन्दः, सर्वारिष्टनिवृत्त्यर्थे विनियोगः।।

ॐ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवा इभेन। तृष्वीमनुप्रसितिं द्रूणानोऽअस्तासि विध्य रक्षसस्तपिष्ठैः।।1। तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः। तपूंष्यग्ने जुह्वा पतंगान संदितो वि सृज विष्वगुल्काः।।2। प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत्।।3। उदग्ने तिष्ठ प्रत्यातनुष्वन्य1मित्राँ ओषतात्तिग्महेते। यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्।।4। ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अव स्थिरा तनुहि यातुजानां जामिमजामिं प्र मृणीहि शत्रून्।।5। स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्। विश्वन्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत्।।6। सेदग्नेऽअस्तु सुभगस्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः। पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः।।7। अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः। स्वश्वास्त्वा सुरथा मर्जयेमाऽस्मे क्षत्राणि धारयेरनु द्यून्।।8। इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून्। क्रीळन्तस्त्वा सुमनसः सपेमाऽभि द्युम्ना तस्थिवांसो जनानाम्।।9। यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन। तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत्।।10। महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय। त्वं नो अस्य वचसश्चिक्लिद्धि होतर्यविष्ठ सुक्रतो दमूनाः।।11। अस्वप्रजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः। ते पायवः सध्र्यंचो निषद्याऽग्ने तव नः पान्त्वमूर।।12। ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन्। ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः।।13। त्वया वयं सधन्यऽ1अस्त्वोतास्तव प्रणीत्यश्याम वाजान्। उभा शंसा सूदय सत्यतातेऽअनुष्ठुया कृणुह्यह्रयाण।।14। अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय। दहाशसो रक्षसः पाह्य1ऽस्मान्द्रुहो निदो मित्रमहो अवद्यात्।।15।

अथवा

ऋग्वेदीया रक्षोघ्नसूक्तम् (10.87.01-25)

ॐ अस्य रक्षोहसूक्तस्य भरद्वाजः पायुर्ऋषिः, रक्षोहाग्निर्देवता, प्रथमाद्येकविंशत्यृचां त्रिष्टुप्ततः समाप्तिपर्यन्तर्चां चानुष्टुप्छन्दसी , सर्वारिष्टनिवृत्त्यर्थे विनियोगः।।

ॐ रक्षोहण वाजिनमा जिघर्मि मित्रं प्रतिष्ठमुप यामि शर्म। शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम्।।1। अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः। आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन्।।2। उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च। उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान्।।3। यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः। ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ग्ध्येषाम्।।4। अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम्। प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि ि

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

चनोतु वृक्णम्। ।5। यत्रेदानीं पश्यति जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम्। यद्वान्तरिक्षे पथिभिः प
तन्तं तमस्ता विध्य शर्वा शिशानः। ।6। उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात्।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास्तमदन्त्वेनीः। ।7। इह प्र ब्रूहि यतमः सो अग्ने यो य
ातुधानो य इदं कृणोति। तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम्। ।8। तीक्ष्णेनाग्ने च
क्षुषा रक्ष यज्ञं प्राञ्चं वसुभ्यः प्र णय प्रचेतः। हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्ष
ाः। ।9। नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा। तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा
मूलं यातुधानस्य वृश्च। ।10। त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति। तमर्चिषा स्फूर्ज
यञ्जातवेदः समक्षमेनं गृणते नि वृङ्धि। ।11। तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि या
तुधानम्। अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष। ।12। यदग्ने अद्य मिथुना शपातो यद्वा
चस्तृष्टं जनयन्त रेभाः। मन्योर्मनसः शरव्याँ3 जायते या तया विध्य हृदये यातुधानान्। ।13। परा श
ृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि। परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो अभि शोश
ुचानः। ।14। पराद्य देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु तृष्टाः। वाचास्तेनं शरव ऋच्छन्तु मर्मा
न्विश्वस्यैतु प्रसितिं यातुधानः। ।15। यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः।
यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च। ।16। संवत्सरीणं पय उस्रियायास्तस्य
माशीद्यातुधानो नृचक्षः। पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यञ्चमर्चिषा विध्य मर्मन्। ।17। विषं गवा
यातुधानाः पिबन्त्वा वृश्च्यन्तामदितये दुरेवाः। परैनान्देवः सविता ददातु परा भागमोषधीनां जयन्ता
म्। ।18। सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः। अनु दह सहमूरान्क्रव्यादो मा ते हे
त्या मुक्षत दैव्यायाः। ।19। त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात्। प्रति ते ते अजरा
सस्तपिष्ठा अघशंसं शोशुचतो दहन्तु। ।20। पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राज
न्। सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः। ।21। परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि
ह। धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम्। ।22। विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह। अग्ने ि
तग्मेन शोचिषा तपुरग्राभिरृष्टिभिः। ।23। प्रत्यग्ने मिथुना दह यातुधाना किमीदिना। सत्वं शिशामि
जागृह्यदब्धं विप्र मन्मभिः। ।24। प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति। यातुधानस्य रक्षसो बलं
वि रुज वीर्यम्। ।25।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM